क्षत्रिय	वैश्य	शूद्र	विप्र	क्षत्रिय	वैश्य	शूद्र	द्विज	क्षत्रिय	वैश्य	शूद्र	विप्र	जातयः
पित्त	वात	सम	कफ	पित्त	वात	सम	कफ	पित्त	वात	सम	कफ	पित्तादि संज्ञा
चर	स्थिर	द्विस्व भाव	चर	स्थिर	द्विस्व भाव	चर	स्थिर	द्विस्व भाव	चर	स्थिर	द्विश्व भाव	चरस्थिरादिसंज्ञा
पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष स्त्री संज्ञा
पृष्ठोदयः	पृष्ठोदयः	शीर्षोदयः	पृष्ठोदयः	शीर्षोदयः	शीर्षोदयः	शीर्षोदयः	शीर्षोदयः	पृष्ठोदयः	पृष्ठोदयः	शीर्षोदयः	उभयोदयः	पृष्ठादिसंज्ञा
रात्रिः	रात्रिः	रात्रिः	रात्रिः	दिन	दिन	दिन	दिन	रात्रिः	रात्रिः	दिन	समान	दिन रात्रि बल
चतुष्पद	चतुष्पद	द्विपद	जलचर	चतुष्पद	द्विपद	द्विपद	कीट	अ.द्वि. ज.च.	अर्द्धच. अर्द्धद्व	जलचर	जलचर	चतुष्पदादि संज्ञा
शीर्ष	मुख	बाहुः	हृदयः	उदर	कटि	वस्ति	शिश्न	उरुद्वय	जानु २	जंघा २	पादद्वय	कालांगनिवास
दक्षिण	अग्नि	उत्तर	वायव्य	पूर्व	उत्तर	अग्नि	याम्य	-ईशानं	पश्चिम	पश्चिम	ईशान	प्लवत्वदिशा
ह्रस्व	ह्रस्व	सम	सम	दीर्घ	दीर्घ	दीर्घ	दीर्घ	सम	सम	ह्रस्व	सम	ह्रस्वदीर्घादिकम्
क्रूर	सौम्य	क्रूर	सौम्य	क्रूर	सौम्य	क्रूर	सौम्य	क्रूर	सौम्य	क्रूर	सौम्य	क्रूरसौम्यस्वसंज्ञा
पूर्व	दक्षिण	पश्चिम	उत्तर	पूर्व	दक्षिण	पश्चिम	उत्तर	पूर्व	दक्षिण	पश्चिम	उत्तर	राशीनां दिशा
मेष भूमि	गोच राशय	गीत नृत्य स्थान	युद्ध जल समीप	अरण्य भूमि	स्त्री गृह नौका	स्वसद्म ऊपरभू	युद्ध सर्प निवास	युद्धभू. वाजि स्थान	वन जल समीप	शि.गृ. पा.भा.	जल समीप	राशिनांनिवास स्थानानि

अथ ग्रहाणां दीप्ताद्यवस्थाज्ञानम्

दीप्तः स्वस्थः प्रमुदितः शान्तो दीनोऽतिदुखितः।। विकलश्च कोपी नवधा खेचरो भवेत्।।१।। उच्चस्थः खेचरो दीप्तः स्वस्थः स्वोच्चाधिमित्रभे।। मुदितो मित्रभेशान्तस्मभवेदीनउच्यते।।२।। शत्रुभं दुःखितोऽतीवविकलः पापसंयुतः।। खलऽखलगृहे ज्ञेयः कोपीस्यादर्क सयुतः।।३।। भावानांस्थिरकारकाः।। सूर्यो १ गुरु २ कुजः ३ सोमः ४ गुरु ५ भौम ६ सितः ७ शनिः ८ गुरु बुधः १० जीवो ११ मन्दश्च १२ भावकारकाः।

अथाङ्गस्फुरणफलचक्रम्

स्थानानि	फलानि	स्थानानि	फलानि	स्थानानि	फलानि
मस्तकस्फुरणे	पृथ्वीलाभः	वक्षःस्फुरणे	विजयध्रुवम्	कण्ठ स्फुरणे	ऐश्वर्य लाभः
ललाटस्फुरणे	स्थानलाभः	हृदयस्फुरणे	वांछितसिद्धिः	ग्रीवास्फुरणे	रिपुभयम्
स्कन्धस्फुरणे	भोगसमृद्धिः	कट यांस्फुरणे	प्रमोदोबलश्च	पृष्ठस्फुरणे	युद्धपराजयः
भ्रुवोयुग्म	सुखप्राप्तिः	कटि पार्श्वे	प्रीतिरनुत्तमा	कपोलस्फु	वरांगनाप्राप्ति
भ्रुवोर्मध्ये	महत्सौ भाग्यं	आंत्रिकस्फुरणे	कोश वृद्धिः	बाहूस्फुरणे	मधुरभोजनम्
नेत्र १ स्फुरणे	धनाप्तिः	भगस्फुरणे	पति प्राप्तिः	बाहुमध्ये	धनागमः
नेत्रकोणयोः	लक्ष्मीलाभः	कुक्षिस्फुरणे	सुप्रीतिलाभः	वस्तिदेशस्फुरणे	अभ्युदयः
नेत्रसमीपे	प्रियसमागमः	उदरस्फुरणे	कोश प्राप्तिः	उरोस्फुरणे	वस्त्रलाभः
नेत्रपक्ष स्फुरणे	राज्यलाभः	लिंगस्फुरणे	स्त्रीलाभः	जानुस्फुरणे	शत्रुवृद्धि
नेत्रपक्ष २ स्फुरणे	संग्रामेजयः	गुदस्फुरणे	वाहन प्राप्तिः	जंघस्फुरणे	स्वामीप्राप्तिः
नेत्रकोपांगदेश १	कलत्रलाभः	वृषस्फुरणे	पुत्रलाभः	पादोपरि	स्थानलाभः
नासिका १ स्फुरणे	प्रीतिसुखम्	ओष्ठस्फुरणे	प्रियवस्तुलाभः	पादतले	नृपत्वम्
हस्तस्फुरणे	सद्द्रव्यलाभः	हनुदेशस्फुरणे	भयंमहत्	पादयोस्फुरणे	अलाभः

अथ तिथिवारयोर्भवारयोर्योगादनेकयोगानां बोधकचक्रम्

योगनामानि	रविवार	सोमवार	मंगलवार	बुधवार	गुरुवार	शुक्रवार	शनिवार
चराख्ययोग	पू.षा.	आर्द्रा	विशाखा	रोहिणी	पुष्य	मघा	मूल
क्रकचयोगः	११ ति.	११ ति.	१० ति.	१ ति.	८ ति.	७ ति.	६ ति.
दग्धयोगः	१२ तिः	११ ति.	५ ति.	३ ति.	६ ति.	८ ति.	९ ति.
विषाख्ययोगः	४ ति.	६ ति.	७ ति.	२ ति.	८ ति.	९ ति.	९ ति.
हुताशनयोगः	११ ति.	६ ति.	७ ति.	८ ति.	९ ति.	१० ति.	११ ति.
यमघंट योगः	मघा	विशाखा	आर्द्रा	मूल	कृत्तिका	रोहिणी	हस्त
दग्धयोगः	भरणी	चित्रा	उ.षा.	धनिष्ठ	उत्तरा.फा.	ज्येष्ठ	रेवती
यमदंष्ट्र योगः	म.घनि.	वि.मू.	कृ.भ.	पू.षा.पुन.	उ.षा.अभि.	रोहि.अनु.	श्र.घ.
सर्वार्थसिद्धि-	ह.मृ.	श्र.रो.	अश्विनी	रो.अनु.	रेवती अनु.	रेवती अनु.	श्रवण
योगः।भवा,	उ.३,पुष्य	मृ.अनु.	उ.भा.	ह.कृ.	अश्विनी	अश्विनी	रोहिणी
रयोर्योगात्	अश्वि	पुष्य	कृ.श्लेषा	मृगशिरा	पुष्य पुनर्वसु	पुन.,श्रवण	स्वाती
अमृतसिद्धियोग	हस्त	मृ.श्र.	अश्वि.	अनुराधा	पुष्य	रेवती	रोहिणी

राशियों का परस्पर शुभाशुभ योग

शुभ नव-पञ्चम		मध्यम नव-पञ्चम		श्रेष्ठ द्विर्द्वादश		अशुभ द्विर्द्वादश		प्रीति-षडाष्टक		शत्रु-षडाष्टक		अशुभ केंद्र	
९	५	९	५	२	१२	२	१२	६	८	६	८	४	१०
मेष	सिंह	कुम्भ	मिथुन	मेष	मीन	वृश्चिक	तुला	मेष	वृश्चि.	वृषभ	धनु	मेष	कर्क
वृष	कन्या	मीन	कर्क	मिथुन	वृष	मकर	धनु	मिथुन	मकर	कर्क	कुम्भ	वृष	सिंह
मिथुन	तुला	कर्क	वृश्चि.	सिंह	कर्क	मीन	कुंभ	सिंह	मीन	कन्या	मेष	कर्क	तुला
सिंह	धनु	कन्या	मकर	तुला	कन्या	वृष	मेष	तुला	वृष	वृश्चि.	मिथुन	कन्या	धनु
तुला	कुम्भ	अशुभ	सप्तक	धनु	वृश्चिक	कर्क	मिथुन	धनु	कर्क	मकर	सिंह	वृश्चि.	कुम्भ
वृश्चि.	मीन	मकर	कर्क	कुम्भ	मकर			कुम्भ	कन्या	मीन	तुला	मकर	कर्क
धनु	मेष	कुम्भ	सिंह	अपवाद								मीन	मिथुन
मकर	वृष			कन्या	सिंह								

विशेष - तृतीय - एकादश संबंध किन्ही भी राशियों का शुभ ही होता है, किंतु सम-सप्तक (राशि-प्रतियोग) तथा केंद्र (चतुर्थ-दशम) संबंध उपर्युक्त अशुभ समसप्तक तथा अशुभ केंद्र की राशियों के अलावा शेष राशियों का भी शुभ होता है।

चन्द्र श्रृंगोन्नति का स्थूलं ज्ञान मेष और मीन राशि के चन्द्रमा का सिरा दक्षिण में (बायें) ऊंचा होता है। वृष और कुंभ राशि के चन्द्रमा का सिरा बराबर होता है। बाकी राशियों के चन्द्रमा का सिरा उत्तर में (दाहिने) ऊंचा होता है।

पुष्यनक्षत्र प्रंशसा-

पुष्य को नक्षत्र सम्राट कहा जाता है। पुष्य नक्षत्र में स्वयं ही सभी दोषों को नष्ट कर देने की क्षमता है। पापैर्विद्धेयुते होने चन्द्रताराबलेऽपि च। पुष्यसिद्धि सर्वाणि कार्याणि मंगलानि च।। ग्रहणे विद्धोप्यशुभान्वितोऽपि विलोमगोऽपि करोत्यवश्यं सकलार्थसिद्धि विहाय पाणिग्रहमेव पुष्ये।। पुष्य की बलवत्ता को देखते हुये इसमें पाणिग्रहण निषिद्ध है।

पञ्चक विचार-

जब घनिष्ठ नक्षत्र के आधे अर्थात् कुंभ राशि पर चन्द्रमा आता है। तब पञ्चक या पचखा आरम्भ होता है। जब अश्विनी नक्षत्र और मेष राशि पर चन्द्रमा आता है तो पञ्चक समाप्त हो जाता है।

धर्म-शास्त्रम्

एकादशी व्रतम्

अथाष्ट वर्षादूर्ध्वमशीतिवर्षपर्यन्तमेकादशी, व्रताधिकारः।।

शक्तस्य तु वयसोऽर्ध्वमध्याधिकारः।। सभर्तृकाणां स्त्रीणां भर्त्रानुज्ञां पुत्राज्ञां च अनुपवासव्रताद्याचरणो व्रतवैफल्यं भत्रायुक्षयो नरकञ्च।। अशक्तायां तु स्वोदन वापि वपु प्रमस्तमात्रोत्तनुरक्तं च इति। अशक्तेषु शक्तितारतम्याल्पाहारः न त्वेकादशीत्यागः। प्रमादादिनेकदस्यामुपोषणाद्यकरणे द्वादश्यामपि व्रतं कार्यम्।। द्वादश्यामप्यकरणे वा तत्रचन्द्रायण प्रायश्चित्तम्। वास्तित्येद्धरणो पिपीलिका मध्यचान्द्रायणम्।। अशक्तेसति, पुत्राच्चदेशेव स्त्रीपुत्रभगिनी भ्रातादिभिरेकादशीव्रताचरणे क्रतुशतजं पुण्यम्।

स्त्रियों के लिये पति आज्ञा प्राप्त करके ही एकादशी व्रत करना चाहिये। इसमें बारम्बार जलपान दिन में सोना, ताम्बूल भक्षण विशेष बोलना तथा विलास वर्जित है। आठ वर्ष से अस्सी वर्ष तक आयु वालों के लिए यह व्रत है। ॐ नमोनारायणाय मन्त्र जप करना चाहिए।

नियमित रूप से एकादशी व्रत रहने वालों को यदि कोई असमर्थता आ जाय तो उनकी पत्नी व्रत रक्खे। उसी प्रकार पत्नी की असमर्थता में पति व्रत करें पुत्र, भगिनी, और भ्राता भी इसके अधिकारी है।

प्रदोष व्रतम्- तत्र त्रयोदशीशुक्ला पूर्वा, कृष्णापरा ग्राह्यमिति माधवःशुक्ला त्रयोदशी प्रदोष-समये हेमाद्रि गौडग्रन्थेषु व्रतञ्च-प्रदोषोस्तसमया दृध्वं घटि काद्वयमप्युच्यते। यस्तु-त्रिमुहूर्तः प्रदोष स्याद्रवावस्त गते सति।। यद्वागोण प्रत्यक्कालपरः।। तेन प्रदोषव्यापिनी त्रयोदशी विलोक्यम्।। द्वितीयदिन व्रतम।। दिनद्वये प्रदोषव्याप्तो तदेकरतदेसव्यापे वा उत्तरा उक्त इति। उद्वैव तिथियोरूभयोः प्रदोषव्यापिनी निर्णयः। तत्र वा त्रिविभाग स्याप्तोभयत्रापि मन्यते। यदा तु कृष्णपक्षे च परविद्धा न मन्यते। तदा वात्रापि पूर्वाविद्धा च ग्राह्येति- वशिष्ठ एकादशी तृतीया च षष्ठीचैव त्रयोदशी पूर्वाविद्धापि कर्तव्या यदि न स्यात्परेऽहनि।। प्रदोषे शनिवार योगस्य विशेषफलम्। शनिवार प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् तत्रापि दुर्लभस्तस्मिन् कृष्णपक्षे समागते।। अथ श्रावणे सोमवासरे व्रतं प्रदोष व्रतवदस्य विधिः।। सोमवासरे व्रतं कार्य श्रावणे वेयथाविधिः। शक्तेस्पोषणं कार्यमथवा निशि भोजनमिति।।

शनि प्रदोष व्रत का विशेष फल है। श्रावण सोमवार व्रत प्रदोष के समान है इसमें रात्रि समय भोजन हो सकता है।

त्रयोपत्रयपज्ञसंख्यस्तत्रमनुः अपीडाद्ब्राह्मणस्य सावित्री नाति बर्तते।। द्वाविंशशाब्दक्षत्रबन्धोराचतुर्विशतेर्विशः।।२।। अतऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्या प्रभुवन्त्यार्विगर्हिता।।२।। अथोपनयने द्वादशवर्षपर्यन्तफलानि।। मेषे भवति पाण्डित्यं वित्तविद्यायुता वृषे। युग्मे वेदान्तदर्शी स्यात्कुलीरे च षडङ्गवित्।। शिल्पधर्म करः सिंहे षष्ठे भवति पण्डितः। तुलायां वणिजः प्रोक्तः धनुषञ्च वृश्चिके। सर्वत्रपूजितश्चापे शूद्रवृत्तिमृगे तथा राजप्रेष्यो भवेत्कुम्भे मीने वदावताङ्गः इति। अन्यविशेषः शास्त्राधिपतिवारंच शाखाधिपः बलं शशी शास्त्राधिपतिबलमश्च। व्रताय दुर्लभवते।। राजमार्तण्डे।। पितुः सूर्यं बले श्रेष्ठं शाखाकर्णवसंदः सर्वेषा गुरुचन्द्रार्कबलं श्रेष्ठं व्रतादिपुरा। उपनयने कालविशेषः- मुख्यकालस्तु बलवान्व्रतं गोचरशुद्धितः। व्रतो निषिद्धकालस्य शान्तिर्नदृश्यते क्वचित्। ब्राह्मण का १६ क्षत्रिय का २२ वर्ष वैश्य का २४ वर्ष तक अवश्य यज्ञोपवीत हो जाना चाहिये।

वैशाख मास - वैशाखे सकले मासे मेषसंक्रमणे रवेः। प्रातः सनियमस्नास्ये प्रीयतां मधुसूदन। मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात्। निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमनुत्तमम्।। माधवे मेषगे भानौ मुरारेमधुसूदन। प्रातःस्नानेन मे नाथ फलदो भव पापहन्।। वैशाखे त्याज्यम्।। कांस्यं मांसं मसुरान्नं चणकं कोद्रवं तथा। शाकं मधुरान्नं च पुनर्भोजनं मैथुनं इति। मेषार्के दानविशेषः। यो मेषस्याऽर्के ददाति सक्तून्गवृघटान्विताम्। उद्दिश्यपितृन् देवांश्च सर्वपापैः प्रमुच्यते।। दानमन्त्रः सक्तवो धर्मदा नित्यं ब्राह्मणप्रीतिकारकाः। त्वद्दानास्यपापानां क्षयोऽस्तु सुखमस्तु च।। वैशाखे सम्पूर्णस्नानाशक्तावन्ते त्रयोदश्यादिदिनत्रयम्।। अपि सम्यग्विधानेननारी पुरुषोऽपिवा प्रातःस्नायी सनियमः सर्वपापैः प्रमुच्यते।। इति।।

अक्षयतृतीया कृत्यम्-सर्वतीर्थे स्नानं देवदर्शनं दानञ्चाक्षयफलम्।। दानम्- उदक्कुम्भान् सकनकान् सान्नसर्वरसैः सह।। यवगोधूमचणकान्सक्तुकुम्भान्तथा। व्यजनछत्रकुम्भंचातपत्रमुपानहौ।। दानमेतद्देयानपितृन चोदिश्यकुर्यात्।। संकल्पः- नामगोत्रमुच्चार्य अद्यतत्र शीतलोकदकयुतं घटं च विष्णुप्रीतये अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। प्रार्थना एष धर्मघटो दत्तो ब्रह्माविष्णु शिवात्मकः। अस्य प्रदानात्स फला मम सन्तु मनोरथाः।। गन्धोदकतिलैर्मिश्रं सान्नं कुम्भं फलान्वितम्। विष्णवेसंप्रदास्यामि अक्षयमुपतिष्ठतु।। पितृन्नद्दिश्यदाने-पितृभ्यसंप्रदानेन मम सन्तु मनोरथाः।। पितृभ्यः संप्रादास्यामीतिपदप्रक्षेपः-संकल्पोपितृणां प्रीतये इति विशेषः। अद्यपरशुरामं विधिवत्संपूज्यार्घ्यंदद्यात्- तन्मंत्रः। जामदग्न्य महावीर क्षत्रियान्तकर प्रभो। गृहाणार्घ्यं मया दत्तं कृपया परमेश्वर।। तत्र विष्णोश्चन्दनपूजनफलम्।। यः करोति तृतीयायां विष्णोश्चन्दनपूजनम्।। वैशाखस्य सिते पक्षे स याति हरिमन्दिरमिति। युगादितिथौ दानादि फलम्।। कृतोपवासः सतिलं युगादिदिनेषु तु। दास्यन्त्यन्नानि सलिलं तेषां लोका महोदयाः।

ज्येष्ठ मास - कंजजपूजनेननानावस्त्रविभूषणैः वर्षकोटिशत सायंसूर्यलोकेमहीते। कंजजो ब्रह्मा। वामनपुराणे-उदकुम्भं जलं धेनु तालवृक्षः सचन्दनम्। त्रिविक्रमस्य प्रीत्यर्थं प्रदद्यात् ज्येष्ठ मासि च।। इति।।

अथामायां वट सावित्रीविधिः।। अमायांञ्च तथा ज्येष्ठे वटपूजे महासती। त्रिरात्रोपोषिता नारी विधिनानेन संयुक्ता सावित्रीप्रतिमां शुभाम्।। विधिनाषोडशोपचारैः संपूज्य ब्राह्मणाय दद्यात्।। तन्मंत्रः सावित्रीयं मया दत्ता सहिरण्या महासती। ब्राह्मणायसती प्रसन्नाथाय ब्राह्मणः प्रतिगृह्यतामिति ज्येष्ठ शुक्लैकादश्यां दशाश्वमेधस्नानफलम्- ज्येष्ठ मासि सितेपक्षे प्राप्य प्रतिपदां तिथिम्। दशाश्वमेध के स्नात्वा मुच्यते सर्व किल्विषैः। दशहरा ज्येष्ठ मासि सितेपक्षे दशमीहस्तसंयुता। हरतेदशपापानितस्माद् दशहरा स्मृताः शुक्लपक्षेसु ज्येष्ठ मासि कुजेऽहनि।। अवतीर्णा यतः स्वर्गात् हस्तर्क्षे च सरिद्वरा।। दशहरां गंगा पूजनमन्त्र।। नमो भगवत्यै दशपाप हरायै गंगायै कृष्णायै विष्णुरूपिण्यै नन्दिन्यै नमोनमः।। दशहरायां दशोयागाः-ज्येष्ठ मासि सिते पक्षे दशमीबुधहस्तयोः व्यतिपाते गरानन्दे कन्याचन्द्रे वृषे रवौ। दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते। बुधभौमयोः कल्पभेदन व्यवस्था। इयं च यत्रैव योगाधिक्यं सैव ग्राह्या।

आषाढ़ मास - आषाढ़शुक्ल २ रथयात्रा।। आषाढ़स्य सिते पक्षे द्वितीयाः पुष्यसंयुता तस्यां रथे समारोप्य रामं सौभद्रयासह। यात्रोत्सव प्रवर्त्याथ प्रीणयेत द्विजान्बहून्। ऋक्षाभावे तिथौ कार्या स सदा प्रीतये मम। अथ रामो बलरामः।। आषाढ़े पूर्णिमायां धान्यानां तोलनम्। आषाढ्यां सर्वधान्यानि संध्यायञ्च पृथक पृथक। तोलयेद्वर्णनाने- जलादीन्यपिसर्वथः।। मन्त्रतोऽभिमन्त्र्य निशितानभिवासयेत् तोलयेच्चततः प्रातस्तेन मानेन दैववित्।। वृद्धोवृद्धिः समेसाम्यं ह्रासेहानिस्तथैव च।

आषाढ़ पूर्णिमायां वायुपरीक्षा।। आषाढ़पूर्णिमायाञ्च प्रदोषे वा दिवा।। निशि।। प्राच्यां वायुसुवृष्टिः स्याद्धान्यनिष्पत्तिस्तमा।।१।। अल्पवृष्टिस्तथाऽग्नेयामग्नि- भीतिर्महर्घता। स्वल्पवृष्टिः भवेद्याम्यां प्रजापीडा महर्घता।।२।। दुर्भिक्षंरौरवंघोरमनावृष्टिश्च नैऋते। वारुण्याञ्च महावृष्टिः धान्योत्पत्तिश्च मध्यमा।।३।। वायौ वायुः प्रचण्डश्च वृष्टि धान्यश्च मध्यम्।। बहुधान्यसुवृष्टिश्च उत्तरायां सुखी जनः।। ईशान्यां सस्य सम्पत्तिधान्यानि सुखिनो जना इति।।

श्रावण मास - श्रावणशुक्लपाञ्चमीयं परविद्धा। पंचमी नागपूजायां कार्या षष्ठ्येसमन्विता।। तस्यान्तु तुषिता नागा इतरा सचतुर्थिका।।१।। श्रावणे पंचमी शुक्ला सम्प्रोक्ता नागपंचमी। ताम्परित्यत्य पंचम्याचतुर्थीसहिता हिता।।२।। नागपूजनविधिः।। श्रावणे मासि पंचम्या शुक्लपक्षे बरानने।। द्वारस्योभवतो लेख्या गोमयेन विषोल्वणाः (सर्पा)।। घृतोदकाभ्यां पयसा तर्पयित्वा वरानने। गोधूम पयसा सैव लाजेश्च विविधेस्तथा पूजयेद्विविधे दीपैर्दैधुपैः प्रचुरैस्तथा। मांल्यपुष्पोपहारैश्चब्राह्मणानामपि तर्पणम्। तेनतुष्टि समायान्ति पद्मकास्तक्षकादयः। आ सप्तमान्कुले तस्य न भयं सर्पतो भवेत।। मन्त्रोऽयमुच्यते सर्वविषस्य प्रतिशोधकः। तस्य जप तस्यामाजन न विषप्रभवते क्वचित। मन्त्रः - ॐ कुंकुलाय हुँफट् स्वाहा अस्य जपात्सर्पविषक्षयः आदौ लिखितस्थले सर्वनागेभ्यो नमः। सर्वनागानावाहयामीत्यावाहनं।। "सर्वनागेभ्यनमः" इति मन्त्रेणयथोपचारैः संपूज्य प्रार्थयेत्।। मन्त्रः अनन्तं वासुकिं शेषं पद्मकम्बलमेव च।। तथा कर्कोटकं नागं नागमभयंतं तथा धृतराष्ट्रं शंखपालंकालाख्यं तक्षकं तथा। पिंगलंच्च महानागं प्रणमामि मुहुर्मुहुरिति।। स्नान क्षौर विचार - सिरः स्नानं प्रकुर्वीत देव पित्र्ये च कर्माण उदङ्मुखः प्राङ्मुखोवा श्मश्रुकर्मचकारयेत्।।

भाद्रपदमास - भाद्रपदे-हृषीकेशप्रीत्यर्थं गुडोदनलवणादेर्दानम्। गणेशचतुर्थी।। विनायकवचनानि।। चतुर्थीगणनाथस्य मातृविद्धाप्रशस्यते। अन्यदपि चतुर्थी तृतीयायां महापुण्यफलप्रदा।। कर्तव्याव्रतिना एव गणनाथसुतोषिता।।१।।

चन्द्रोदयेऽर्घ्यदानमंत्र- क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भवः। गृहाणार्घ्यंशशांकेदंरोहिणी सहितोमम।। ज्योत्स्नापतयेतुभ्यंज्योतिष्ठपतयेनमः। नमस्तेरोहिणीकान्त सुधावास नमोस्तु ते।।२।। नमोमण्डल दीपाय शिरोसाय धूर्जटेः। कालाभिर्वर्द्धमानायनमश्चन्द्राय चारवे।।३।।

अगस्त्यार्घ्यदानमन्त्रः- ऋग्वेदसंहितायाम्- अगस्त्यः श्वनमानःखनित्रैः प्रजामपत्यंबलमिच्छमानः। उभौवर्णावृषिरुग्रःपुपोषसत्याददेवेष्वाशिषोजगाम्।।

जन्माष्टमीविशेषः। अष्टमी कृष्णपक्षस्य रोहिणी ऋक्षसंयुता। भवेत्प्रोष्ठपदे मासि जयन्तीनाम सा स्मृता। विष्णुधर्मोत्तरे। रोहिण्यामर्द्धरात्रे तु सदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम्। समायोगे तु रोहिण्यांनिशीथे राजसत्तम्। समाजायतगोविन्दो बालरूपी चतुर्भुजः।। अष्ट मीरोहिणीयुक्ता निशार्द्धे यदिदृश्यते। मुख्यकालइतिख्यातस्तत्रजातो हरिः स्वयम्। रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम। कृष्ण जयन्ती सा प्रोक्ता। सर्वपापहरी तिथिः।

जन्माष्टमीव्रतपारणानिर्णयो निर्णयसिन्धौ।। स्मार्तानां द्वितीय-दिनेऽष्टम्यायामद्भयादिखसत्त्वेऽपि प्रातःकाल एवं पारणेतः। तिथ्यन्ते तिथि भान्ते वा पारणा यत्रचोदिता। यामद्वयोर्ध्वगामिन्यां प्रातरेवहि पारणम् सर्वत्रतं पारणायसमयः। तिथ्यन्ते चोत्सवान्ते चव्रती कुर्वीतपारणम्।। अथव्रतनाशकारणि असकृज्जलपानाच्च सकृताम्बूलभक्षणात्। उपवासः प्रणश्येत्। दिवास्वापाच्च मैथुनात्।। अथ व्रतीनां विशेषनियमः। गात्राभ्यङ्गशिरोऽभ्यंगं ताम्बूलंचानुलेपनम्। व्रतस्थोवर्जयेत्सर्वं यच्चान्यत्र निराकृतम्। कचिन्न्द्विकालपरिते ऽपि। प्रायश्चितं व्रती कुर्यान्ज्जप्त्वाष्टसहस्रकम्। मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे। अष्टाक्षरजपाज्जप्त्वाशतमष्टोत्तरं शुचिः अष्टाक्षरमन्त्र- ॐ नमो नारायणाय।

हरतालिकाव्रतनिर्णयः- तत्र चुर्थोसहिता या तु सा तृतीया फलप्रदा अवैधव्यकरा स्त्रीणांपुत्रपौत्रप्रवर्धिनी।। चतुर्थ्यांचन्द्रदर्शनदोषशमनाय पठनीयमन्त्रः सिंहःप्रसेनमवधीत् सिंहो जाम्बवताहतः। सुकुमारकमारोदीः तवह्येषस्यमन्तकः।। इति।। पंचम्यामपामार्गदन्तधावनमन्त्रः- आयुर्बलं यशोवर्चः प्रजापशुवसूनि च ब्रह्मप्रज्ञां च मेधांच त्वन्नो देहि वनस्पते।।१।। मुखदौर्गन्ध्यनाशाय दन्तानाच विशुद्धये ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम्।।२।। षष्ठ्यां सूर्यपूजनम्। निर्णयसिन्धौ।। शुक्ल भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम्। प्राशनात्पंचगव्यस्य अश्वमेधफलाधिकम्।। पंचगव्यप्राशनमन्त्रः - यत्त्वगस्थिगतं पापं देहेतिष्ठति मामके। प्राशनात्पंचगव्यस्य दहत्वाग्निरिवेन्धनमिति।। श्रवणयुक्ताद्वादश्यां विष्णुपरिवर्तनोत्सवः। रात्रौषोडशोपचारैः श्री विष्णु संपूज्य प्रार्थयेत्।। वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तिथिः। पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधवः। श्रवणं १२ उत्तराषाढ़युक्ता नैवोपोष्या। उत्तराषाढ़संयुक्ता श्रोणामाध्याह्नगापि वा आसुरी सैव तारस्याद्वतिपुण्यपुरहरम्।। बुधे श्रवण संयुक्ता सैव द्वादशी भवेत्। अत्यन्तमहतीपोष्याव्रतं भवति चाक्षयम्, अनन्तचतुर्दशीनिर्णयः। मध्याह्नव्यापिनी त्रिमुहूर्तोदयकालव्यापिनी चतुर्दशीपक्षे च वचनानि लभ्यन्ते तत्र माधवः सूर्योदयकालव्यापिनी हि अन्ये दिवोदासगतापमार्तण्ड-कालविश्वरमकालिदासादयः मध्याह्नव्यापिनी या च भाद्रशुक्ला चतुर्दशी। सैवानन्तव्रते ग्राह्या पर्वयुक्त विशेषतः। ज्योतिर्विदाभरणे मध्याह्नकालान्तगता-चतुर्दशीहिताहिसाभाद्रपदेनृयापिताम्। बुधैरनन्तमादतन्वदा तदा कलोनापि ततः फलाप्तये। माधव निर्णयनिर्णयसिन्धुकाराः भ्रान्ति कथयन्ति। तत्कथाप्रासंगेकमुक्तव्रतादि निर्णयविरोधादिनाऽयुक्तमेव। अतोसंध्याह्नव्यापिन्येव ग्राह्याः।

आश्विनमास - जीवत्पुत्रिकामहालक्ष्मीव्रतयोनिर्णयः महालक्ष्मीव्रतेऽष्टमीचन्द्रो व्यापिनी ग्राह्या। पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा जीवत्पुत्रिका- तुलक्ष्मीव्रतंचाभ्युदिते शशांके यत्राष्टमी आश्विनकृष्ण पक्षे यत्रोदयः वेकुरुते दिनेशस्तदा भवेत्ज्जीवत्पुत्रीकाख्या। अत्रविशेष पूर्वद्युरन्यद्युः वा प्रदोषे यत्र चाष्टमी। तत्र पूज्यः स नारीभिः राजा जीमूतवाहनः। अन्यच्च प्रदोषसमयेस्त्रीभिः पूज्योजीमूत वाहन। इति मैथिल निवन्धनिर्णयः।

अथ सर्वेषां श्राद्धानांकाल विभागः- पूर्वाह्नेदैविकं श्राद्धमपराह्ने पार्वणम्। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्। शुक्लपक्षस्य पूर्वाह्ने श्राद्धं कुर्याद्विचक्षणः।। कृष्णपक्षेऽपराह्ने च रोहिणं न तु लंघयेत्।। क्षयाहे विशेषः। न ज्ञायते मृताहश्चेत्प्रतिविज्ञातदशध्यात्मृतेऽहनि। श्राद्धविघ्नेनिर्णयः श्राद्धविघ्नेसमुत्पन्नेह्यविज्ञाता मृतेऽहनि कर्तव्यं कृष्णपक्षे विशेषतः।। इति गयाश्राद्धकालः।। मीने मेषेस्थिते सूर्ये कन्यायांकार्मुकेघटे। दुर्लभंत्रिषुलोकेषु गयायां पिण्ड पातनम्।। मकरे वर्तमाने च ग्रहणे चन्द्रसूर्ययोः। दुर्लभं त्रि।। गयायांसर्वकालेषुपिण्डंदद्याद्विचक्षणः। अधिमासे जन्मदिने तथास्ते गुरुशुक्रयोः।। न कर्तव्यं गयाश्राद्धं सिंहस्थे च वृहस्पतौ। गयाश्राद्धं प्रकुर्वीतसंक्रान्त्यादौ विशेषतः कालेवपरपक्षे:वा चतुर्थ्यादितिथिष्वपि महालयं गयाश्राद्धं मातापित्रोमृतेऽहनि। कृतोद्वाहोऽपि कुर्यात् पिण्डदानं यथा विधि।। मृताहंचसपिण्डञ्च गयाश्राद्धं महालयम्।

आश्विनशुक्लप्रतिपदा - कलशस्थापनम्।। तत्र विधिः- स्नानं मांगलिकं कृत्वा ततो देवी प्रपूजयेत्। शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम्।।१।। अन्नान्वै वापयेत्तत्र जलकुम्भसमन्वितान् तत्र संस्थापयेत्कुम्भं विधिनामन्त्र पूर्वकम्।।२।। सावर्णं रजतं वापि ताम्रमृण्मयन्तुर्वेति। आदौसंकल्पः देशकालौसंकीर्त्य ममेहजन्मनि दुर्गाप्रीति द्वारा सकलापच्छान्ति पूर्वक दीर्घायुर्विपुल धन पुत्र पौत्राद्यनवच्छिन्नसन्तति वृद्धि स्थिरलक्ष्मीकीर्तिलाभ शत्रु पराजय सदाभीष्ट सिद्धयर्थंशारदनवरात्रप्रतिपदिहित- कलशस्थापनं दुर्गापूजनं कुमारी पूजनादिकं च करिष्ये।। ततो यथाविधिकलश वैदिकमन्त्रैः संस्थाप्य तदुपरि वरुणमावाह्य सम्पूज्य नूतनप्रतिमायां वा दुर्गामावाह्य पूजयेत्। पूजनमन्त्रः। जयन्तीमंगलाकाली भद्र कालीकपालिनी दुर्गाक्षमाशिवाधात्री स्वाहास्वधानमोस्तुते।। ॐ दुर्गे २ रक्षीणी २ स्वाहेतिमन्त्रेण सम्पूज्य प्रार्थयेत् आनन्द वरदे देवि दैत्यदर्पनिपातिनी। पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये।।१।। सर्वतीर्थमयं वारि सर्वदेवसमन्विते। इमं घटं समागच्छ तिष्ठ देवगणेस्सह।।२।। दुर्गेदेवि समागच्छ सान्निध्यमिह कल्पय। बलि पूजां गृहाणत्वमष्टाभिः शक्तिभिः सह एकैक पूजनातकन्या मेकवृद्धयापि वा पुनः। द्विगुणां त्रिगुणां वापि प्रत्यहं नवकन्तु वा नवभिर्लभ्यते भूमिमैश्वर्यं द्विगुणेन तु। एकवर्षा तु या कन्या पूजार्थेतां विवर्जयेत।। कन्यापूजनेऽन्योविशेषः। ब्राह्मणी सर्वकार्येषु युद्धार्थे क्षत्रियः तथाधनार्थे वैश्यवंशस्य सुखार्थे शूद्रवंशजा। दारुणां चान्त्यजातीयां पूजयेद्विधिना नरेरिति।।

हनुमज्जन्मनिर्णय- वाराहपुराणेः-कार्तिकस्यासितेपक्षेस्वात्यां भौमे चतुर्दशी। मेषलग्नेऽञ्जनीगर्भात् स्वयं जातो हरः शिव। शुक्लादिमासगणनाया आ.कृ.।। का.कृ. तुलार्के मेषलग्नेसालोक जन्मोत्सवः द्वितीय दिने दर्शन पूजनं चोक्तं। अमायां लक्ष्मी पूजा। देशकालौ संकीर्त्य ममगृहेऽचल श्रीवासायलक्ष्मी पूजनं करिष्ये। विहितोपचारैः पूजान्ते प्रार्थना।। नमस्ते सर्वदेवानां वरदासि हरिप्रिये। या गतिस्तंव प्रपन्नानां सा मे भवतु तव दर्शनात्।

तुलासंक्रमणदीपदानम्-तुलायांतिलतैलेन सायंकालेसमागते। आकाशदीपं यो दद्यात्मासमेकं हरि-प्रति। महता श्रियमाप्नोति जय सौभाग्यसम्पदः। आकाशदीपदान मन्त्रः। दामोदराय नभसि तुलायां लोलया सह। प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे।

प्रतिपदादितुलासंक्रान्ति यावत्।। अथगोवत्सद्वादश्यां-सवत्सरं पयस्विनी गां- अलंकृत्य विधिवत्सम्पूज्य ताम्रपात्रेण अर्घ्यंदद्यात्।। मन्त्रः। क्षीरोदार्णवसंभूते सुरासुर नमस्कृते। सर्वदेवमयी मातर्गृहाणार्घ्यं नमोनमः।। कार्तिकृष्ण त्रयोदश्याम्- सायंकालेऽपमृत्युनिवारकं गृहाद्वहिर्यमाय दीपदानम्। तत्र मन्त्रः। मृत्युनां पाशदण्डाभ्यां कालेन यमया सह। त्रयोदश्यां दीपदानात सूर्यजः प्रीयतां ममेति। कार्तिकस्यासितेपक्षे निशामुखे। यमदीपं बहिर्दद्यादपमृत्युविनश्यतीति। अद्यैव नरकोद्देशेन चतुर्वर्तिसमायुक्तं सर्व पापप्रणुत्तये।। अत्रयमतर्पणमुक्तंमदनपारिजाते वृद्धमनुना। दीपोत्सवे चतुर्दश्यां कार्तिके यमतर्पणम्। अपामार्गस्य पत्राणि भ्रामयन्मस्तकोपरि। ततश्चतर्पणं कार्यं धर्मराजं नमामि इति। कार्तिकमास कृत्यम-विष्णुं कार्तिके सकलं मासं प्रातः स्नायी च जितेन्द्रियः। जपन् हविष्यं भुग्दान्तः सर्वपापैः प्रमुच्यते। वामनपुराणे-अद्य कनकं दीपान्मणिफलादिकम्। दामोदरस्य प्रीत्यर्थम् प्रदद्यात् कार्तिकमासे। प्रबोधनोत्सवः। अत्रैकादश्यां द्वादश्यां वा षोडशोपचारैः विष्णुं तुलसीं च विधिवत्संपूज्य प्रबोधयेत्। प्रबोधमन्त्रा वाराहपुराणोक्ताः।। ब्रह्मेन्द्र रुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दितवन्दनाय।। बुद्धस्वदेवेश जगन्निवास मन्त्रप्रभावेण सुखेन चैव। इयन्तु द्वादशी देवप्रबोधानार्थं विनिर्मिता। त्वमेव सर्वलोकानां हितार्थंशेषशायिना।। उत्तिष्ठोत्तिष्ठ गोविन्द त्यजनिद्रां जगत्पते। त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम्। स्थिते बोध्यते सर्वं उत्तिष्ठोत्तिष्ठ माधव। गतामेघा वियच्चैव निर्मलं निर्मला दिशः। शारदानि च पुष्पाणि गृहाण मम केशवः। इन्द्रविष्णुरितिप्रोक्तो मंत्र उत्थापन हरेरिति चतुर्मास्य व्रत समाप्ति का मंत्र इदंव्रतं मया देव कृतं प्राप्त तव प्रभो। तेन मे पूर्णतां यातु त्वत्प्रसादाज्जनार्दन इति।। **कार्तिकशुक्ल सूर्यषष्ठी निर्णयः।।** कलाकाष्ठानिमेषोऽपि यदि स्यादपरेऽहनि। षष्ठ्याः कथंचिदद्विपेन्द्रसेवोपोष्यामहातिथिः। षष्ट्यामुपोष्य विधिवत् सप्तम्यामर्कं पूजयेत्। सद्द्रव्यभोग्यायुश्चेव सम्प्राप्नोतीप्सितं फलम्।। उपोष्यगमा ६, त्यक्त्वा च यदेक पूजयेदिति विधौ श्वोऽध्यादिना पुनरस्यैव प्राधान्यापगमात्, पूर्वदिनेऽध्यादिना पूजयेत् सायं ६ वा ७ तिथिः ग्राह्येति नियमः।। ध्रुव निर्णयोरामनायकृतातिथिनिर्णय, ल्लिखितो व्रतस्य तत्देशीयत्वात्। यमद्वितीया निर्णयः- यामद्वितीयां प्रतिपद्युताग्राहा।। यमद्वितीया मध्याह्न व्यापिनी पूर्वविद्ध, चेति हेमाद्रि। ऊर्जशुक्लद्वितीया यामापराह्नेऽर्चयेत् यमम। स्नानंकृत्वाभानुजायां यम लोकं न पश्यति। प्रतिपदिविध स्कः लभ्यं यदि वा प्रातः प्रतिपदघटि त्रेकापरयुक्तान्यायपूर्वा।।५।। स्कन्दव्रतंऽविरिक्ता परा सदा।।७।। पूर्वाविध्येव सर्वदा।।८।। कृष्णपूर्वा शुक्लेपरा शिवदेवासंवादे कृष्णाऽपि परैव।।२।। कार्यम् नारीनिराजनं प्रातः मंगलमालिका।। गोवर्धन पूजापानगोवर्धनं पूज्य व्रतं चापि समाचरेत।। गोवर्धनपूजैव गोवर्धनपूज- भ्रातृभोजन-पूर्वागम् गोवर्धनपूजयेति।

अस्तापवादमाह। नित्ययाने गृहे जीर्णे प्राशने परिधान के वधूप्रवेशे मांगल्ये न मौढ्यं गुरुशुक्रयोः। गोदावर्यां गयायां च तीर्थेषु ग्रहणद्वये। अयने विषुवेचैव चातुर्मास्यव्रतादिषु। उत्सवेषु च सर्वेषु सीमन्ते च ऋतुत्रये सुरासुरेज्ययोश्चात्र मौढप्रदोषो न विद्यते इति।।

पौषपूर्णिमातो माघस्नानमन्त्राः।। दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च। प्रातः स्नानं करोम्यद्यमाघेपापविनाशने। मकरस्थे रवौ माघे गोविन्दाच्युतमाधव। सपित्रेप्रसवित्रे देवे यथोक्तफलदोभव।। मंत्राविमौ पठन स्नायाततोऽर्घ्यदानमन्त्रः सवित्रेसावित्रे च परं धाम जले मम।। त्वत्ते जसा परिभ्रष्टं पापं यातु सहस्रधा। ततस्तर्पणादिकं कर्त्तव्यमिति।।

यावन्माघस्नानमसक्तो दिनत्रयम्।। माघमासे पुरस्कृत्य स्नायात दिनत्रयमिति।। माघे प्रयागस्नान माहत्म्यं प्रयागे माघमासे तु त्र्यहं स्नानस्य यत्फलं अश्वमेधसहस्रेण तत्फलं लभते भुवि।। अथ मकरसंक्रांति फलं स्कान्देधेनुं तिलमयो राजन् योदद्याच्चोत्तरायणे सर्वान् कामनावाप्नोतिविन्दते परम् सुखम्।। माघे देयाः तैलकम्बलकाश्चैवतीर्थे देयास्तु नित्यशः। ततः प्रज्वालयेद्वह्नि सेवनार्थं द्विजन्मनाम्।।१।। एवं स्नाना वासाने तु भोज्यं देयं च वस्त्रादिकम्। भोजयेद्द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः।।२।। कम्बलाजिनरत्नादि वासांसि विविधानि चोलकानि च देयानिप्रच्छादनवस्त्रानि।।३।। उपानहौ तथा ? गुप्तमोचको पापमोचको अनेन विधिना स्नानेन माधवः प्रीयतामिति।।४।। माघमासनियमः।। भूमौ शयीत होतव्या आज्यन्तिलसमन्वितम्। सर्वान् कामनावाप्नोति विन्दते परम् सुखम्।। विष्णुधर्मोत्तरेः सौम्यायने तु विप्राय वस्त्रदाने महत्फलम्। तिलपूर्णमाषां दत्वा रोगैः प्रमुच्यते।। शिवरहस्ये च तस्यां कृष्णतिलेस्नानं कार्यचोद्वर्तनं शुभम्।। तिलादेयाश्च विप्रेभ्यः सर्वदेवचोत्तरायणे।। तिलतैलेन दीपश्च देयाः शिवगृहे शुभा इति।। प्रयागे तीर्थ स्नानमुक्तं काशीखण्डे।। काश्यां दशाश्वमेध ये तपसि स्नान्ति मानवाः। दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवमिति।। माघकृष्णचतुर्थ्यांतु प्रादुर्भूतो गणेश्वर इति। अत्रषट्तिला पापनाशनीति।। अमायांऽवशेषमाघे क्रियते दानं तद्दान मेरुसन्निभम्। तत्र सावित्रीसहित ब्राह्मणं पूजयित्वा धेनुदद्यात् हेमाद्रि भविष्योत्तरः। अमायां माघमासस्य पूजयित्वा पितामह। गायत्री सहितं देववेदांगभूषितम्।। नवनीतमयी धेनुं फलैर्नानाविधैर्युताम्। सहिरण्यां सवस्त्राणांचब्राह्मणाय निवेदयेत्।। कीर्तयेत्प्रीयतामत्र सनातनः पद्मयोनिः। स्थाने स्वर्गेऽथपाताले यन्मर्त्ये किंचिदुत्तमम् तदाप्नोत्यसंदिग्ध पद्मयोनेः प्रसादतः।

माघ शुक्लसप्तसंख्या येनार्चयतेरवितत् पापविनाशाय- श्री भास्करप्रीत्यर्थमरुणोदये स्नानमन्त्रः यद्यदाचरितं पापं मया जन्मसुजन्मसु। तन्मे च शोकं च माकरीहन्तु सप्तमी। यद्यदत्र कृतं पापं यच्च जन्मान्तरार्जितम्। मनोवाक्कायजं स्यापि ज्ञाताज्ञातंचयेपुनः- इति सप्तविधं पापं स्नानान्मे सप्तिसप्तके। सप्तव्याधिसमायुक्तेहर माकरिसप्तमी।। स्नानान्तर अर्घ्यम् दद्यात्। सप्तर्षिसहितो देव गृहाणार्घ्यं दिवाकर इति। जननी सर्वलोकानां सप्तमी सप्तप्तिके। भीष्माष्टम्यां तर्पणम्। तत्र मंत्रः। वैयाघ्रपदगोत्राय सांकृत्य प्रवराय च। गंगापुत्राय भीष्माय सर्वदाब्रह्मचारिणे। इति।।

अथ शिवरात्रिव्रतमहात्म्यम् - परात्परं नास्ति शिवरात्रिः परात्परम्। येनार्चितं भक्तेशं रुद्रत्रिभुवनेश्वरम्।।१।। जन्म-जन्मसहस्रेषु भ्रमते नात्रः संशयः वर्षे वर्षे महादेवो नरोनारोपतिव्रता ।।२।। शिवरात्रौ महादेव नित्यं भक्त्या प्रपूज्येत्। अर्णवोयादिवा शुष्येत् क्षीयतेहिमवानपि।।३।।

फाल्गुनशुक्लपूर्णिमायां होलिका दाहः- तत्रपूजा- देशकालौ संकीर्त्य मम सुकुटुम्बस्य दुण्ढाराक्षसीपीड़ापरिहारार्थं होलिका पूजनमहं करिष्ये। असक्त्याभयसंत्रस्तैः कृत्वा त्वम् होलिवालिशे। अतस्त्वां पूजयित्वाभूते-भूतिप्रदाभव इति ध्यात्वा। होलिकायै नमः इति। विहितोपचारान्ते दीपनमन्त्र। दीपयाम्यद्यते घोरे चिति रक्षांसि सप्तमे। हिताय सर्वजगतां प्रीतये पार्वतीपतेः। अनेनार्चनेन होलिका-धिष्ठात्रीदेवताप्रीयताम्। होलिकायां ज्वलितायाम्। तमग्निं त्रिपरिक्रम्य शब्दैर्लिंगभगादिगतैः तेन शब्देन सा पापाराक्षसी तृप्तिमाप्नुयात्। द्वितीयदिने होलिका भस्मधारण मन्त्रः- वन्दितासि सुरेन्द्रेण ब्रह्मणा शंकरेण च। अतस्त्वं पाहिनो देवि विभूतिर्भूतिदाभवति।। होलिकावायु परीक्षा- पूर्वे राजा प्रजासुखं आग्नेमग्निभयं दक्षिणनेऋत्येदुर्भिक्षं पश्चिमे महावृष्टि वायव्ये वायुवृद्धिः, उत्तरे सुभिक्षं ईशान्याञ्च प्रजासुखं संक्षेपात्सकाल-तिथिनिर्णयः। रम्भाहित्वापराविद्धा।। गणेशव्रते चन्द्रोदये ग्राह्यम् ।।५।। नागपूजायां सर्वत्र पूर्वविद्धम्।।१०।। नवमीयुक्तं च शुभाऽलाभे औदयिकी ।।१।। स्मार्तरुदयव्यापिनी ।५९। दण्डालिकापोष्या। पारणार्थाद्वादश्यांलाभे १० विद्धाप्युपोष्या। परमपोष्या।। परमवैष्णवे ५३ दण्डाधिकाया द्वादश्या मुपवासतेनकदाचिद् दशमी विद्धाया सामान्य वैष्णवः ५५ दण्डाधिकाया द्वादश्या मुपलासीनकदाचिद् दशमी विद्धाया सामान्य वैष्णवः ५५ दण्डात्मिका-एकादशी नैवोपोष्या।१२। सर्वत्र सर्वान पूर्वविद्धाकृष्णा परविद्धा कृष्णापूर्वा शुक्लापरा।।१५।।

संक्षिप्त पूजन विधि

पूजा प्रारम्भ करने से पूर्व पूजक (यजमान या स्वयं) स्वस्थचित्त होकर आसन पर बैठकर 'ॐ केशवाय नमः, ॐ नारायणाय नमः, ॐ माधवाय नमः' कहकर आचमन करे तत्पश्चात् 'ॐ हृषीकेषाय नमः' उच्चारणपूर्वक हस्तप्रक्षालन कर 'ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥' इस मन्त्र के साथ सबसे पहले बाये हाथ में जल लेकर दाहिने हाथ से शरीर की पवित्रता हेतु जल छिड़कने के बाद प्राणायाम करें। 'ॐ स्वस्ति नऽइन्द्रोवृद्धश्रवाःस्वस्ति नः पूषा-विश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनो बृहस्पतिर्दधातु।' इत्यादि मन्त्र के साथ स्वस्ति वाचन तथा गणपत्यादि देवताओं का स्मरण करें अनन्तर तदनन्तर हाथ में जल, पुष्प, सुपारी, दक्षिणा लेकर संकल्प करें- 'ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणोऽहनि द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तैकदेशान्तर्गते बौद्धावतारे........... नाम्निसंवत्सरे.......अयने.........ऋतौ......... मासे.....पक्षे.....तिथौ...... वासरे.......नक्षत्रे शेषेषु ग्रहेषु यथा-यथा राशिस्थानेषुस्थितेषु सत्सु एवं ग्रहगुणगण-विशेषणविशिष्टायां....... गोत्रोत्पन्नः....... नामाऽहं मम कायिक-वाचिक-मानसिकज्ञाताज्ञात-सकलदोषपरिहार्थं श्रुति-स्मृतिपुराणोक्त-फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सकलकामना-सिद्ध्यर्थञ्च यथाज्ञानेन यथामिलितोपचारद्रव्यैः पूजनमहं करिष्ये।' तत्पश्चात् सुपारी पर मौली लपेट कर चावलों पर स्थापित करें और नीचे लिखे आवाहन मन्त्र पढ़कर अक्षत छोड़ें। यदि मूर्ति हो तो पुष्प छोड़े। आवाहनम्-गजाननम्भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम्॥ उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपंकजम्॥ आगच्छ भगवन्देव। स्थाने चात्र स्थिरो भव। यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव॥ आसनम्-रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम्। आसनं च मया दत्तं गृहाण परमेश्वर!॥ (आसनं समर्पयामि) प्रतिष्ठा-अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च। अस्यै देवत्वमर्चायै मामहेति च कश्चन॥ पाद्यम्-उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम्। पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम्॥ (पाद्यं समर्पयामि) अर्घ्यम्-अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह। करुणां कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते। (अर्घ्यं समर्पयामि)। आचमनम्-सर्वतीर्थसमायुक्तं सुगन्धिं निर्मलं जलम्॥ आचम्यतां मया दत्तं गृहीत्वा परमेश्वर॥ (आचमनीयम् समर्पयामि) स्नानम्-गङ्गा सरस्वती रेवा पयोष्णीनर्मदाजलैः। स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे॥ (स्नानम् समर्पयामि)। दुग्धस्नानम्)-कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥ (दुग्धस्नानम् समर्पयामि) दधिस्नानम्-पयसा तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्॥ (दधिस्नानम् समर्पयामि) घृतस्नानम्-नवनीतसमुत्पन्नं सर्वसन्तोषकारकं। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥ (घृतस्नानम् समर्पयामि) मधुस्नानम्-तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधुः। तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥ (मधुस्नानम् समर्पयामि)। शर्करास्नानम्-इक्षुसारसमुद्भूता शर्करा पुष्टिकारकम्। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥ (शर्करास्नानं समर्पयामि)। पंचामृतस्नानं-पयोदधिघृतं चैव मधु च शर्करा युतम्। पंचामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम्॥ (पंचामृतस्नानं समर्पयामि) चन्दनम्-मलयाचलसम्भूतं चन्दनागरुसम्भवम् चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम्॥ (चंदन स्नानं समर्पयामि) शुद्धोदकस्नानम्-मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम्। तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम्॥ (शुद्धोदकस्नानं समर्पयामि) अनन्तर शुद्धदेववस्त्र से भगवान को पोछें तत्पश्चात् वस्त्रम्-सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे। मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम्। (वस्त्रम् समर्पयामि)। यज्ञोपवीतम्-नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्। उपवीतं मया दत्तं गृहाण परमेश्वर॥ (यज्ञोपवीतम् समर्पयामि) गन्धम्-श्रीखण्डश्चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्। (गन्धम् समर्पयामि) रोली-कुंकुमं कामनादिव्यं कामिनीकामसम्भवाम्। कुंकुमेनार्चितो देव गृहाण परमेश्वर!॥ (रोली समर्पयामि) सिन्दूरम्-सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्द्धनम्। शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥ (सिन्दूरम् समर्पयामि) अक्षतम्-अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः। मया निवेदिता भक्त्या गृहाण परमेश्वर!॥ (अक्षतान् समर्पयामि) पुष्पम्-पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः। पूजार्थं नीयते तुभ्यं पुष्पाणि प्रतिगृह्यताम्॥ (पुष्पम् समर्पयामि) पुष्पमालाम्-माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो! मयानीतानि पुष्पाणि गृहाण परमेश्वर। (पुष्पमालां समर्पयामि) बिल्वपत्रम्-त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः। तव पूजां करिष्यामि गृहाण परमेश्वर॥ (बिल्वपत्रम् समर्पयामि) दुर्वा-त्वं दुर्वेऽमृतजन्मासि वन्दितासि सुरैरपि। सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव॥ (दुर्वा समर्पयामि) दुर्वांकुरम्-दुर्वांकुरान् सुहरितानमृतान् मंगलप्रदान्। आनीतांस्तव पूजार्थं गृहाण गणनायकः॥ (दुर्वांकुरान् समर्पयामि) शमीपत्र-शमी शमय मे पापं शमी लोहितकण्टकी। धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी। (शमीपत्रम् समर्पयामि) अबीरगुलालम्-अबीरं च गुलालं च चोवा चन्दनमेव च। अबीरेणार्चितो देव अतः शान्तिं प्रयच्छ मे॥ (अबीरगुलालञ्च समर्पयामि) आभूषणम्-अलंकारान्महादिव्यान्नानारत्नविनिर्मितान्। गृहाण देवदेवेश प्रसीद परमेश्वरः॥ (आभूषणम् समर्पयामि) धूपम्-वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥ (धूपम् दर्शयामि) दीपम्-साज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥ (दीपम् दर्शयामि) नैवेद्यम्-शर्कराघृतसंयुक्तं मधुरं स्वादुचोत्तमम्। उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम्॥ (नैवेद्यम् निवेदयामि) मध्ये पानीयसमर्पणम्-अतितृप्तिकरं तोयं सुगन्धिं च पिबेच्छया। त्वयि तृप्ते जगत्तृप्तं नित्यतृप्ते महात्मनि!। (मध्ये पानीयं समर्पयामि) ऋतुफलम्-इदं फलं मया देव! स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि। (ऋतुफलम् समर्पयामि) आचमनम्-गङ्गाजलं समानीतं सुवर्णकलशेस्थितम्। आचम्यतां सुरश्रेष्ठ शुद्धमाचमनीयकम॥ (आचमनीयं समर्पयामि) ताम्बूलम् पुंगीफलञ्च-पुंगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम्। (ताम्बूलं पुंगीफलञ्च समर्पयामि) दक्षिणा-हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥ (दक्षिणां समर्पयामि) आरती-चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च। त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम्॥ (आर्तिक्यं दर्शयामि) पुष्पाञ्जलिम्-नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च। पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर!॥ (पुष्पाञ्जलिं समर्पयामि) प्रार्थना-रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षकः। भक्तानामभयं कर्ता त्राता भव भवार्णवात्। (प्रार्थनां समर्पयामि) अनया पूजया श्रीमहागणपतिः प्रीयतां न मम॥ इसी प्रकार अन्य देवों की भी पूजा करनी चाहिये। □

संदिग्ध व्रत-पर्व निर्णय

१. नवसंवत्सरः-काशीस्थ शीर्षस्थ ज्योतिषियों पञ्चाङ्गकारों सम्पादकों के एक उच्चस्तरीय विमर्श के पश्चात सर्वसम्मति से यह निर्णय लिया गया कि चैत्र शुक्ल प्रतिपदा १९ मार्च गुरुवार सन् २०२६ से "रौद्र" नामक संवत्सर का विनियोग वर्षपर्यन्त संकल्प आदि धार्मिक कृत्यों में किया जायेगा। साथ ही इस वर्ष विगत चैत्र कृष्ण अमावस्या गुरुवार १९ मार्च गुरुवार को चैत्र शुक्ल प्रतिपदा का क्षय हुआ है। इस प्रकार शास्त्र के नियम के अनुसार क्षयवती प्रतिपदा में ही नवसंवत्सरारम्भ एवं वासन्तिकनवरात्रारम्भ हो जायेगा। **कलश स्थापन प्रातः ६।४० बजे के बाद दिनभर किसी भी समय किया जा सकता है।**

२. गंगादशहरा-यदि ज्येष्ठ के महीने में मलमास लगता है तो गंगा दशहरा का प्रसिद्ध पर्व मलमास में पड़ने वाली ज्येष्ठ शुक्ल दशमी तिथि को ही मनाया जायेगा। तदनुसार अधिक ज्येष्ठ शुक्ल पक्ष दशमी (१०) मंगलवार २६ मई को ही गंगा दशहरा का पर्व एवं स्नान सम्पन्न होगा। **"ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे।"**

३. रक्षाबन्धन-२८ अगस्त शुक्रवार को श्रावण पूर्णिमा तिथि दिन में ९।१८ बजे तक है। भद्रा नहीं है अतः रक्षाबन्धन के लिये पूरा दिन मुहूर्त है। इसे भद्रारहित और तीन मुहूर्त से अधिक उदयकाल व्यापिनी पूर्णिमा मे करना चाहिए। **"अथ रक्षाबन्धनमस्यामेव पूर्णिमायां भद्रारहितायां त्रिमुहूर्ताधिको व्यापिन्यामपराह्णे प्रदोषे वा कार्यम्।"**

४. श्रीकृष्णजन्माष्टमी- इस वर्ष जन्माष्टमी व्रत-पर्व के लिये ४ सितम्बर २०२६ शुक्रवार को उदया तिथि अष्टमी रात ११।१३ बजे तक है तथा रोहिणी नक्षत्र भी रात ११।१२ बजे तक है। इस प्रकार औदयिक अष्टमी एवं रोहिणी नक्षत्र दोनो एक साथ एक ही दिन ४ सितम्बर शुक्रवार को जयन्ती योग में श्रीकृष्ण जन्माष्टमी का पर्व सबके लिये होगा। **"समायोगे तु रोहिण्यां निशीथे राज सत्तम्। समजायत गोविन्दो बालरूपी चतुर्भुजः।।"** इस वर्ष की श्रीकृष्णजन्माष्टमी अति उत्तम योगवती है।

५. शारदीय नवरात्र-इस वर्ष का शारदीय नवरात्र १० दिन का होगा क्योंकि अष्टमी तिथि की वृद्धि हुयी है। नवरात्रारम्भ का कलश स्थापन चित्रा नक्षत्र एवं वैधृति योग होने के कारण ११ अक्टूबर रविवार को मध्याह्न अभिजित मुहूर्त में ११।३६ बजे से १२।२४ बजे के मध्य किया जायेगा। नवरात्रारम्भ के कलश स्थापन में चित्रा नक्षत्र एवं वैधृति योग त्याज्य है। **"सम्पूर्णा प्रतिपद्देव चित्रा युक्ता यदा भवेत्। वैधृत्या वापि युक्ता स्यात्तदा मध्यंदिने रवौ।"** महाष्टमी का मान १८ अक्टूबर रविवार को होगा तथा महानवमी १९ अक्टूबर सोमवार को मनाई जायेगी।

६. विजयादशमी-२० अक्टूबर मंगलवार को उदयातिथि नवमी दिन ९।३५ बजे तक है। उसके पश्चात् दशमी तिथि लग जायेगी। श्रवण नक्षत्र भी दिन ४।८ बजे तक है। इस प्रकार दशमी तिथि एवं श्रवण नक्षत्र का संयोग अपराह्न काल में मिल जा रहा है। अतः **विजयादशमी** का प्रसिद्ध पर्व **२० अक्टूबर मंगलवार** को मनाया जायेगा क्योंकि २१ अक्टूबर को श्रवण नक्षत्र दशमी तिथि का संयोग नही बन रहा है। **"सा च द्वितीयदिने श्रवण योगाभावे पूर्वा प्राह्या।"**

७. धनतेरस-प्रदोष काल में त्रयोदशी तिथि ६ नवम्बर शुक्रवार को मिल रही है अतः धनतेरस धनत्रयोदशी एवं धन्वन्तरि जयन्ती ६ नवम्बर शुक्रवार को मनाई जायेगी।

८. दीपावली-प्रदोष एवं रात्रि व्यापिनी कार्तिक कृष्ण अमावस्या में ही दीपावली का प्रसिद्ध पर्व ८ नवम्बर रविवार को पूरे देश में एक साथ एक ही दिन मनाया जायेगा। लक्ष्मी पूजा के लिए तीन मुहूर्त निर्धारित किये जा रहे है-१.व्यावसायिक प्रतिष्ठानो में जहाँ दिन में ही **लक्ष्मी पूजन** किया जाना हो वहाँ स्थिर कुम्भ लग्न १।० से २।३१ बजे तक। २.सर्वोत्तम प्रदोष काल का स्थिर वृष लग्न सायं ५।३७ बजे से ७।३४ बजे तक तथा ३.महानिशा मे **काली पूजा** एवं तंत्र मन्त्र सिद्धि के लिए स्थिर सिंह लग्न रात १२।५से २।१९ बजे तक। स्थानीय समय के अनुसार स्थान विशेष का समय निर्धारित किया जायेगा। कृपया लग्न परिवर्तन तालिका (पृष्ठ ४६) से काशी के उपरोक्त समय में स्थानीय समय के अनुसार धन-ऋण कर समय निर्धारित कर लें।

९. होलिकादहन-होलिका दहन तीन शास्त्रीय नियमों का पालन करते हुए किया जाता है। १.फाल्गुन शुक्ल पूर्णिमा तिथि हो। २.रात का समय हो एवं ३.भद्रा बीत चुकी हो। इस वर्ष **२१मार्च रविवार को** सायं ५।१४ बजे के बाद चतुर्दशी उपरान्त पूर्णिमा तिथि प्रारम्भ हो जायेगी तथा उसी के साथ भद्रा भी प्रारम्भ होकर रात ४।२७ बजे तक है अतः ऐसी परिस्थिति में शास्त्र के नियम के अनुसार भद्रा पुच्छ रात १२।२६ बजे से लेकर १।३८ बजे तक का समय 'होलिका दहन' के मुहूर्त के लिए निर्धारित किया गया है। **"प्रदोष व्यापिनी प्राह्या पौर्णिमा फाल्गुनी सदा। तस्यां भद्रा मुखं त्यक्त्वा पूज्या होलानिशामुखे।"**

१०. होली धुरेड़ी-काशी की परम्परा है कि होलिका दहन के साथ ही होली का उत्सव काशी में स्थित चतुर्षष्टी (चौसट्ठी देवी) की यात्रा कर उनको रंग-गुलाल चढ़ाकर होली का पर्व शुरु हो जाता है। अतः काशी मे होली का पर्व २२ मार्च सोमवार को ही मनाया जायेगा। शास्त्र के नियमानुसार चैत्र कृष्ण प्रतिपदा २३ मार्च मंगलवार को वसन्तोत्सव सहित होली का पर्व पूरे देश में (काशी से अन्यत्र) मनाया जायेगा।

भारतीय पर्व एवं व्रतोपवास संवत् २०८३

विक्रम नवसंवत् वसन्त नवरात्रारम्भ	१९ मार्च	गुरु.
झुलेलाल जयन्ती	२० मार्च	शुक्र.
मुस्लिम पर्व ईद	२१ मार्च	शनि.
चैती छठ	२४ मार्च	मंगल.
श्रीरामनवमी	२७ मार्च	शुक्र.
महावीर जयन्ती (जैन)	३१ मार्च	मंगल.
चैत्री पूर्णिमा, श्री हनुमद् जयन्ती	२ अप्रैल	गुरु.
मेष-सतू संक्रान्ति, अम्बेडकर जयन्ती	१४ अप्रैल	मंगल.
श्री परशुराम जयन्ती	१९ अप्रैल	रवि.
अक्षय तृतीया	२० अप्रैल	सोम.
आद्यजगत गुरु शंकराचार्य जयन्ती	२२ अप्रैल	बुध.
श्री रामानुजाचार्य जयन्ती	२२ अप्रैल	बुध.
गंगा सप्तमी, बाबू कुँवर सिंह जयन्ती	२३ अप्रैल	गुरु.
श्री नृसिंह जयन्ती	३० अप्रैल	गुरु.
वैशाख पूर्णिमा, बुद्ध जयन्ती	१ मई	शुक्र.
वट सावित्री व्रत (बरगदाई)	१६ मई	शनि.
मलमासारम्भ	१७ मई	रवि.
श्रीगंगा दशहरा	२६ मई	मंगल.
मलमास समाप्ति, सोमवती अमावस्या	१५ जून	सोम.
निर्जला एकादशी (भीमसेनी)	२५ जून	गुरु.
मु.पर्व मुहर्रम	२६ जून	शुक्र.
सन्त कबीर जयन्ती, ज्येष्ठ पूर्णिमा	२९ जून	सोम.
रथयात्रा	१६ जुलाई	गुरु.
हरिशयनी एकादशी	२५ जुलाई	शनि.
गुरु पूर्णिमा	२९ जुलाई	बुध.
धर्मसम्राट स्वामी करपात्री जयन्ती	१४ अगस्त	शुक्र.
हरियाली तीज, कजरीतीज, भार.स्वतन्त्रता दिवस	१५ अगस्त	शनि.
नाग पंचमी	१७ अगस्त	सोम
रक्षाबन्धन	२८ अगस्त	शुक्र.
हलषष्ठी, ललही छठ	२ सितम्बर	बुध.
श्रीकृष्ण जन्माष्टमी सबकी	४ सितम्बर	शुक्र.
कुशोत्पाटिनी अमावस्या	१० सितम्बर	गुरु.
हरितालिका तीज, गणेशोत्सव	१४ सितम्बर	सोम.
वैनायकी वरद श्रीगणेश चतुर्थी		
ऋषि पंचमी	१५ सितम्बर	मंगल.
लोलार्क षष्ठी, विश्वकर्मा पूजा	१७ सितम्बर	गुरु.
महारविवार व्रत	२० सितम्बर	रवि.
अनन्त चतुर्दशी	२५ सितम्बर	शुक्र.
पितृपक्ष श्राद्ध तर्पणारम्भ	२७ सितम्बर	शुक्र.
गांधी व शास्त्री जयन्ती	२ अक्टूबर	शुक्र.
महालक्ष्मी पूजन समापन	३ अक्टूबर	शनि.
जीवित्पुत्रिका व्रत, सोरहिया मेला समाप्त	३ अक्टूबर	शनि.
मातृनवमी	४ अक्टूबर	रवि.
सर्वपैतृ अमावस्या, पितृ-विसर्जन	१० अक्टूबर	शनि.
शारदीय नवरात्रारम्भ	११ अक्टूबर	रवि.
महाअष्टमी	१८ अक्टूबर	रवि.
महानवमी	१९ अक्टूबर	सोम.
विजयादशमी	२० अक्टूबर	मंगल.
पापांकुशा एकादशी, भरत मिलाप (काशी)	२२ अक्टूबर	गुरु.
कोजागरी, शरद पूर्णिमा	२५ अक्टूबर	रवि.
पूर्णिमा, वाल्मीकि जयन्ती	२६ अक्टूबर	सोम.
करक चतुर्थी, करवा चौथ	२९ अक्टूबर	गुरु.
अहोई अष्टमी	१ नवम्बर	रवि.
राधाष्टमी, राधा जयन्ती	२ नवम्बर	सोम.
धनतेरस, धन्वन्तरी जयन्ती	६ नवम्बर	शुक्र.
नरक चतुर्दशी, हनुमत जयन्ती	७ नवम्बर	शनि.
दीपावली	८ नवम्बर	रवि.
अन्नकूट, काशी से अन्यत्र गोवर्धन पूजा	९ नवम्बर	सोम.
काशी गोवर्धनपूजा, भईयादूज, चित्रगुप्तपूजा	१० नवम्बर	मंगल.
सूर्यषष्ठी व्रतारम्भ, नागनथैय्या (काशी)	१३ नवम्बर	शुक्र.
सूर्यषष्ठी (डाला छठ)	१५ नवम्बर	रवि.
गोपाष्टमी	१७ नवम्बर	मंगल.
अक्षय नवमी	१८ नवम्बर	बुध.
हरिप्रबोधिनी एकादशी, तुलसी विवाहोत्सव	२० नवम्बर	शुक्र.
वैकुण्ठ चतुर्दशी	२३ नवम्बर	सोम.
कार्तिक पूर्णिमा, गुरुनानकजयन्ती, देवदीपावली	२४ नवम्बर	मंगल.
श्रीकालाष्टमी, कालभैरवाष्टमी जयन्ती	१ दिसम्बर	मंगल.
रुद्रव्रत (पीड़िया)	९ दिसम्बर	बुध.
विवाह पंचमी	१४ दिसम्बर	सोम.
मोक्षदा एकादशी, गीता जयन्ती	२० दिसम्बर	रवि.
श्रीदत्तात्रेय जयन्ती	२३ दिसम्बर	बुध.
क्रिसमस डे, बड़ा दिन, मालवीय-अटल जयन्ती	२५ दिसम्बर	शुक्र.
गुरुगोविन्द सिंह जयन्ती (नवीन मत)	५ जनवरी	मंगल.
स्वामी विवेकानन्द जयन्ती (अंग्रेजी दिनांक)	१२ जनवरी	मंगल.
मकर संक्रान्ति का पुण्यकाल (खिचड़ी पर्व)	१५ जनवरी	शुक्र.
नेताजी सुभाष चन्द्र बोस जयन्ती	२३ जनवरी	शनि.
गणेश चौथ	२५ जनवरी	सोम.
भारतीय गणतन्त्र दिवस	२६ जनवरी	मंगल.
मौनी अमावस्या	६ फरवरी	शनि.
वसन्त पंचमी	११ फरवरी	गुरु.
हरसुब्रह्मदेव जयन्ती, महानन्दा नवमी	१५ फरवरी	सोम.
माघी पूर्णिमा, रविदास जयन्ती	२० फरवरी	शनि.
जानकी जयन्ती	२८ फरवरी	रवि.
महाशिवरात्रि	६ मार्च	शनि.
आमलकी रंगभरी एकादशी	१८ मार्च	गुरु.
होलिकादहन	२१ मार्च	रवि.
होली रंगोत्सव (काशी में)	२२ मार्च	सोम.
बसन्तोत्सव, धुरेड़ी सर्वत्र	२३ मार्च	मंगल.
बुढ़वा मंगल	३० मार्च	मंगल.
महा वारुणी पर्व योग	३ अप्रैल	शनि.
संवत्सर २०८३ समाप्त	६ अप्रैल	मंगल.

पत्र व्यवहार का पता-

रामेश्वरनाथ ओझा एम.ए. ज्योतिषाचार्य

प्रधान सम्पादक

श्रीमहावीर पञ्चाङ्गम्

कार्यालय

बी. ३७/१८२-क, खन्ना वाटिका, बिरदोपुर, वाराणसी-२२१०१०

ज्योतिष सम्बन्धी विमर्श के लिये पत्र भेजें, उत्तर दिया जायेगा।

सत्वाधिकारी रामेश्वरनाथ ओझा की ओर से आनन्द अग्रवाल द्वारा मुद्रित तथा सह प्रकाशक सावित्री ठाकुर प्रकाशन, वाराणसी से प्रकाशित।